दुर्गा सप्तशती — अध्याय 1

Durga Saptashati — Chapter 1

Source: Selected 1894 core — chapter 1, printed pages 33–73. Also compared: Opening invocation and speaker — physical scan 53; Closing position and colophon — physical scan 93; Printed 1894 imprint — physical scan 7; Sanskrit comparison only — chapter 1, physical scans 73–89.

प्रारम्भ — नमस्कार और वक्ता

MANTRA

ॐ नमश्चण्डिकायै।

oṃ namaścaṇḍikāyai|

SPEAKER

मार्कण्डेय उवाच।

mārkaṇḍeya uvāca|

अध्याय 1 — प्रथम चरित्र

TEXT POSITION 1

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः।
निशामय तदुत्पत्तिं विस्तराद्भदतो मम॥

sāvarṇiḥ sūryatanayo yo manuḥ kathyate'ṣṭamaḥ|
niśāmaya tadutpattiṃ vistarādgadato mama||

TEXT POSITION 2

महामायानुभावेन यथा मन्वन्तराधिपः।
स बभूव महाभागः सावर्णिस्तनयो रवेः॥

mahāmāyānubhāvena yathā manvantarādhipaḥ|
sa babhūva mahābhāgaḥ sāvarṇistanayo raveḥ||

TEXT POSITION 3

स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः।
सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले॥

svārociṣe'ntare pūrvaṃ caitravaṃśasamudbhavaḥ|
suratho nāma rājābhūtsamaste kṣitimaṇḍale||

TEXT POSITION 4

तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौरसान्।
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तथा॥

tasya pālayataḥ samyakprajāḥ putrānivaurasān|
babhūvuḥ śatravo bhūpāḥ kolāvidhvaṃsinastathā||

TEXT POSITION 5

तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः।
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः॥

tasya tairabhavadyuddhamatiprabaladaṇḍinaḥ|
nyūnairapi sa tairyuddhe kolāvidhvaṃsibhirjitaḥ||

TEXT POSITION 6

ततः स्वपुरमायातो निजदेशाधिपोऽभवत्।
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः॥

tataḥ svapuramāyāto nijadeśādhipo'bhavat|
ākrāntaḥ sa mahābhāgastaistadā prabalāribhiḥ||

TEXT POSITION 7

अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः।
कोशो बलं चापहृतं तत्रापि स्वपुरे सतः॥

amātyairbalibhirduṣṭairdurbalasya durātmabhiḥ|
kośo balaṃ cāpahṛtaṃ tatrāpi svapure sataḥ||

TEXT POSITION 8

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः।
एकाकी हयमारुह्य जगाम गहनं वनम्॥

tato mṛgayāvyājena hṛtasvāmyaḥ sa bhūpatiḥ|
ekākī hayamāruhya jagāma gahanaṃ vanam||

TEXT POSITION 9

स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः।
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम्॥

sa tatrāśramamadrākṣīddvijavaryasya medhasaḥ|
praśāntaśvāpadākīrṇaṃ muniśiṣyopaśobhitam||

TEXT POSITION 10

तस्थौ कञ्चित्स कालं च मुनिना तेन सत्कृतः।
इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे॥

tasthau kañcitsa kālaṃ ca muninā tena satkṛtaḥ|
itaścetaśca vicaraṃstasminmunivarāśrame||

TEXT POSITION 11

सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः।
मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत्॥

so'cintayattadā tatra mamatvākṛṣṭacetanaḥ|
matpūrvaiḥ pālitaṃ pūrvaṃ mayā hīnaṃ puraṃ hi tat||

TEXT POSITION 12

मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा।
न जाने स प्रधानो मे शूरहस्ती सदामदः॥

madbhṛtyaistairasadvṛttairdharmataḥ pālyate na vā|
na jāne sa pradhāno me śūrahastī sadāmadaḥ||

TEXT POSITION 13

मम वैरिवशं यातः कान्भोगानुपलप्स्यते।
ये ममानुगता नित्यं प्रसादधनभोजनैः॥

mama vairivaśaṃ yātaḥ kānbhogānupalapsyate|
ye mamānugatā nityaṃ prasādadhanabhojanaiḥ||

TEXT POSITION 14

अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम्।
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम्॥

anuvṛttiṃ dhruvaṃ te'dya kurvantyanyamahībhṛtām|
asamyagvyayaśīlaistaiḥ kurvadbhiḥ satataṃ vyayam||

TEXT POSITION 15

सञ्चितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति।
एतच्चान्यच्च सततं चिन्तयामास पार्थिवः॥

sañcitaḥ so'tiduḥkhena kṣayaṃ kośo gamiṣyati|
etaccānyacca satataṃ cintayāmāsa pārthivaḥ||

TEXT POSITION 16

तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः।
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः॥

tatra viprāśramābhyāśe vaiśyamekaṃ dadarśa saḥ|
sa pṛṣṭastena kastvaṃ bho hetuścāgamane'tra kaḥ||

TEXT POSITION 17

सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे।
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम्॥

saśoka iva kasmāttvaṃ durmanā iva lakṣyase|
ityākarṇya vacastasya bhūpateḥ praṇayoditam||

TEXT POSITION 18

प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम्।
वैश्य उवाच।
समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले॥

pratyuvāca sa taṃ vaiśyaḥ praśrayāvanato nṛpam|
vaiśya uvāca|
samādhirnāma vaiśyo'hamutpanno dhanināṃ kule||

TEXT POSITION 19

पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः।
विहीनः स्वजनैर्दरिः पुत्रैरादाय मे धनम्॥

putradārairnirastaśca dhanalobhādasādhubhiḥ|
vihīnaḥ svajanairdāraiḥ putrairādāya me dhanam||

TEXT POSITION 20

वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः।
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम्॥

vanamabhyāgato duḥkhī nirastaścāptabandhubhiḥ|
so'haṃ na vedmi putrāṇāṃ kuśalākuśalātmikām||

TEXT POSITION 21

प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः।
किं नु तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम्॥

pravṛttiṃ svajanānāṃ ca dārāṇāṃ cātra saṃsthitaḥ|
kiṃ nu teṣāṃ gṛhe kṣemamakṣemaṃ kiṃ nu sāmpratam||

TEXT POSITION 22

कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः।
राजोवाच।
यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः।
तेषु किं भवतः स्नेहमनुबध्नाति मानसम्॥

kathaṃ te kiṃ nu sadvṛttā durvṛttāḥ kiṃ nu me sutāḥ|
rājovāca|
yairnirasto bhavāṁllubdhaiḥ putradārādibhirdhanaiḥ|
teṣu kiṃ bhavataḥ snehamanubadhnāti mānasam||

TEXT POSITION 23

वैश्य उवाच।
एवमेतद्यथा प्राह भवानस्मद्गतं वचः।
किं करोमि न बध्नाति मम निष्ठुरतां मनः॥

vaiśya uvāca|
evametadyathā prāha bhavānasmadgataṃ vacaḥ|
kiṃ karomi na badhnāti mama niṣṭhuratāṃ manaḥ||

TEXT POSITION 24

यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः।
पतिस्वजनहार्दं च हार्दं तेष्वेव मे मनः॥

yaiḥ santyajya pitṛsnehaṃ dhanalubdhairnirākṛtaḥ|
patisvajanahārdaṃ ca hārdaṃ teṣveva me manaḥ||

TEXT POSITION 25

किमेतन्नाभिजानामि जानन्नपि महामते।
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु॥

kimetannābhijānāmi jānannapi mahāmate|
yatpremapravaṇaṃ cittaṃ viguṇeṣvapi bandhuṣu||

TEXT POSITION 26

तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते।
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम्॥

teṣāṃ kṛte me niḥśvāso daurmanasyaṃ ca jāyate|
karomi kiṃ yanna manasteṣvaprītiṣu niṣṭhuram||

TEXT POSITION 27

मार्कण्डेय उवाच।
ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ।
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः॥

mārkaṇḍeya uvāca|
tatastau sahitau vipra taṃ muniṃ samupasthitau|
samādhirnāma vaiśyo'sau sa ca pārthivasattamaḥ||

TEXT POSITION 28

कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम्।
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ॥

kṛtvā tu tau yathānyāyaṃ yathārhaṃ tena saṃvidam|
upaviṣṭau kathāḥ kāściccakraturvaiśyapārthivau||

TEXT POSITION 29

राजोवाच।
भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत्।
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना॥

rājovāca|
bhagavaṃstvāmahaṃ praṣṭumicchāmyekaṃ vadasva tat|
duḥkhāya yanme manasaḥ svacittāyattatāṃ vinā||

TEXT POSITION 30

ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि।
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम॥

mamatvaṃ gatarājyasya rājyāṅgeṣvakhileṣvapi|
jānato'pi yathājñasya kimetanmunisattama||

TEXT POSITION 31

अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः।
स्वजनेन च सन्त्यक्तस्तेषु हार्दी तथाप्यति॥

ayaṃ ca nikṛtaḥ putrairdārairbhṛtyaistathojjhitaḥ|
svajanena ca santyaktasteṣu hārdī tathāpyati||

TEXT POSITION 32

एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ।
दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ॥

evameṣa tathāhaṃ ca dvāvapyatyantaduḥkhitau|
dṛṣṭadoṣe'pi viṣaye mamatvākṛṣṭamānasau||

TEXT POSITION 33

तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि।
ममास्य च भवत्येषा विवेकान्धस्य मूढता॥

tatkimetanmahābhāga yanmoho jñāninorapi|
mamāsya ca bhavatyeṣā vivekāndhasya mūḍhatā||

TEXT POSITION 34

ऋषिरुवाच।
ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे।
विषयश्च महाभाग याति चैवं पृथक्पृथक्॥

ṛṣiruvāca|
jñānamasti samastasya jantorviṣayagocare|
viṣayaśca mahābhāga yāti caivaṃ pṛthakpṛthak||

TEXT POSITION 35

दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः॥

divāndhāḥ prāṇinaḥ kecidrātrāvandhāstathāpare|
keciddivā tathā rātrau prāṇinastulyadṛṣṭayaḥ||

TEXT POSITION 36

ज्ञानिनो मनुजाः सत्यं किं नु ते नहि केवलम्।
यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः॥

jñānino manujāḥ satyaṃ kiṃ nu te nahi kevalam|
yato hi jñāninaḥ sarve paśupakṣimṛgādayaḥ||

Note: This print reads किं नु ते; the comparison main line reads किं तु ते. The meaning is kept to the shared point: humans are not the only creatures with awareness.

TEXT POSITION 37

ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम्।
मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः॥

jñānaṃ ca tanmanuṣyāṇāṃ yatteṣāṃ mṛgapakṣiṇām|
manuṣyāṇāṃ ca yatteṣāṃ tulyamanyattathobhayoḥ||

TEXT POSITION 38

ज्ञानेऽपि सति पश्यैतान्पतङ्गाञ्छावचञ्चुषु।
कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा॥

jñāne'pi sati paśyaitānpataṅgāñchāvacañcuṣu|
kaṇamokṣādṛtānmohātpīḍyamānānapi kṣudhā||

TEXT POSITION 39

मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति।
लोभात्प्रत्युपकाराय नन्वेतान्किं न पश्यसि॥

mānuṣā manujavyāghra sābhilāṣāḥ sutānprati|
lobhātpratyupakārāya nanvetānkiṃ na paśyasi||

Note: The primary image is damaged within this position. The uncertain letters are supplied from the matching ancient Sanskrit core in the comparison image (leaf 80, printed positions 52–53), not claimed independently legible in the 1894 scan. The primary footnote also records नन्वेते किं न; this reader retains नन्वेतान्किं न.

TEXT POSITION 40

तथापि ममतावर्ते मोहगर्ते निपातिताः।
महामायाप्रभावेण संसारस्थितिकारिणा॥

tathāpi mamatāvarte mohagarte nipātitāḥ|
mahāmāyāprabhāveṇa saṃsārasthitikāriṇā||

TEXT POSITION 41

तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः।
महामाया हरेश्चैतया संमोहितं जगत्॥

tannātra vismayaḥ kāryo yoganidrā jagatpateḥ|
mahāmāyā hareścaitayā saṃmohitaṃ jagat||

Note: The selected main line reads हरेश्चैतया संमोहितं जगत्; its footnote gives हरेश्चैषा तया. The comparison main text uses हरेश्चैषा तया सम्मोह्यते जगत् across its positions 55–56. The selected shortened main wording is retained and not silently repaired for metre; the meaning stays with the shared point that the world is bewildered.

TEXT POSITION 42

ज्ञानिनामपि चेतांसि देवी भगवती हि सा।
बलादाकृष्य मोहाय महामाया प्रयच्छति॥

jñāninmāmapi cetāṃsi devī bhagavatī hi sā|
balādākṛṣya mohāya mahāmāyā prayacchati||

TEXT POSITION 43

तया विसृज्यते विश्वं त्रैलोक्यं सचराचरम्।
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये॥

tayā visṛjyate viśvaṃ trailokyaṃ sacarācaram|
saiṣā prasannā varadā nṛṇāṃ bhavati muktaye||

TEXT POSITION 44

सा विद्यापरमा मुक्तेर्हेतुभूता सनातनी।
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी॥

sā vidyāparamā mukterhetubhūtā sanātanī|
saṃsārabandhahetuśca saiva sarveśvareśvarī||

TEXT POSITION 45

राजोवाच।
भगवन्का हि सा देवी महामायेति यां भवान्।
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज॥

rājovāca|
bhagavankā hi sā devī mahāmāyeti yāṃ bhavān|
bravīti kathamutpannā sā karmāsyāśca kiṃ dvija||

TEXT POSITION 46

यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा।
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर॥

yatprabhāvā ca sā devī yatsvarūpā yadudbhavā|
tatsarvaṃ śrotumicchāmi tvatto brahmavidāṃ vara||

TEXT POSITION 47

ऋषिरुवाच।
नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम्।
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम॥

ṛṣiruvāca|
nityaiva sā jaganmūrtistayā sarvamidaṃ tatam|
tathāpi tatsamutpattirbahudhā śrūyatāṃ mama||

TEXT POSITION 48

देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा।
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते॥

devānāṃ kāryasiddhyarthamāvirbhavati sā yadā|
utpanneti tadā loke sā nityāpyabhidhīyate||

TEXT POSITION 49

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते।
आस्तीर्य शेषमभजत्कल्पान्ते भगवान्प्रभुः॥

yoganidrāṃ yadā viṣṇurjagatyekārṇavīkṛte|
āstīrya śeṣamabhajatkalpānte bhagavānprabhuḥ||

TEXT POSITION 50

तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ॥

tadā dvāvasurau ghorau vikhyātau madhukaiṭabhau|
viṣṇukarṇamalodbhūtau hantuṃ brahmāṇamudyatau||

TEXT POSITION 51

स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः।
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम्॥

sa nābhikamale viṣṇoḥ sthito brahmā prajāpatiḥ|
dṛṣṭvā tāvasurau cograu prasuptaṃ ca janārdanam||

TEXT POSITION 52

तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम्॥

tuṣṭāva yoganidrāṃ tāmekāgrahṛdayasthitaḥ|
vibodhanārthāya harerharinetrakṛtālayām||

TEXT POSITION 53

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम्।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः॥

viśveśvarīṃ jagaddhātrīṃ sthitisaṃhārakāriṇīm|
nidrāṃ bhagavatīṃ viṣṇoratulāṃ tejasaḥ prabhuḥ||

TEXT POSITION 54

ब्रह्मोवाच।
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता॥

brahmovāca|
tvaṃ svāhā tvaṃ svadhā tvaṃ hi vaṣaṭkāraḥ svarātmikā|
sudhā tvamakṣare nitye tridhā mātrātmikā sthitā||

TEXT POSITION 55

अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः।
त्वमेव सा त्वं सावित्री त्वं देवि जननी परा॥

ardhamātrāsthitā nityā yānuccāryā viśeṣataḥ|
tvameva sā tvaṃ sāvitrī tvaṃ devi jananī parā||

Note: This selected main line has त्वमेव सा त्वं सावित्री; the comparison instead prints त्वमेव संध्या सावित्री. Sandhya is not silently imported into this reader.

TEXT POSITION 56

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत्।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा॥

tvayaitaddhāryate viśvaṃ tvayaitatsṛjyate jagat|
tvayaitatpālyate devi tvamatsyante ca sarvadā||

TEXT POSITION 57

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये॥

visṛṣṭau sṛṣṭirūpā tvaṃ sthitirūpā ca pālane|
tathā saṃhṛtirūpānte jagato'sya jaganmaye||

TEXT POSITION 58

महाविद्या महामाया महामेधा महास्मृतिः।
महामोहा च भवती महादेवी महासुरी॥

mahāvidyā mahāmāyā mahāmedhā mahāsmṛtiḥ|
mahāmohā ca bhavatī mahādevī mahāsurī||

TEXT POSITION 59

प्रकृतिस्त्वं हि सर्वस्य गुणत्रयविभाविनी।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा॥

prakṛtistvaṃ hi sarvasya guṇatrayavibhāvinī|
kālarātrirmahārātrirmoharātriśca dāruṇā||

TEXT POSITION 60

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च॥

tvaṃ śrīstvamīśvarī tvaṃ hrīstvaṃ buddhirbodhalakṣaṇā|
lajjā puṣṭistathā tuṣṭistvaṃ śāntiḥ kṣāntireva ca||

TEXT POSITION 61

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा॥

khaḍginī śūlinī ghorā gadinī cakriṇī tathā|
śaṅkhinī cāpinī bāṇabhuśuṇḍīparighāyudhā||

TEXT POSITION 62

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी।
परापराणां परमा त्वमेव परमेश्वरी॥

saumyā saumyatarāśeṣasaumyebhyastvatisundarī|
parāparāṇāṃ paramā tvameva parameśvarī||

TEXT POSITION 63

यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा॥

yacca kiñcitkvacidvastu sadasadvākhilātmike|
tasya sarvasya yā śaktiḥ sā tvaṃ kiṃ stūyase tadā||

TEXT POSITION 64

यया त्वया जगत्स्रष्टा जगत्पातात्ति यो जगत्।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः॥

yayā tvayā jagatsraṣṭā jagatpātātti yo jagat|
so'pi nidrāvaśaṃ nītaḥ kastvāṃ stotumiheśvaraḥ||

TEXT POSITION 65

विष्णुः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत्॥

viṣṇuḥ śarīragrahaṇamahamīśāna eva ca|
kāritāste yato'tastvāṃ kaḥ stotuṃ śaktimānbhavet||

TEXT POSITION 66

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ॥

sā tvamitthaṃ prabhāvaiḥ svairudārairdevi saṃstutā|
mohayaitau durādharṣāvasurau madhukaiṭabhau||

TEXT POSITION 67

प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ॥

prabodhaṃ ca jagatsvāmī nīyatāmacyuto laghu|
bodhaśca kriyatāmasya hantumetau mahāsurau||

TEXT POSITION 68

ऋषिरुवाच।
एवं स्तुता तदा देवी तामसी तत्र वेधसा।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ॥

ṛṣiruvāca|
evaṃ stutā tadā devī tāmasī tatra vedhasā|
viṣṇoḥ prabodhanārthāya nihantuṃ madhukaiṭabhau||

TEXT POSITION 69

नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः॥

netrāsyanāsikābāhuhṛdayebhyastathorasaḥ|
nirgamya darśane tasthau brahmaṇo'vyaktajanmanaḥ||

TEXT POSITION 70

उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः।
एकार्णवेऽहिशयनात्ततः स ददृशे च तौ॥

uttasthau ca jagannāthastayā mukto janārdanaḥ|
ekārṇave'hiśayanāttataḥ sa dadṛśe ca tau||

TEXT POSITION 71

मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ।
क्रोधरक्तेक्षणौ हन्तुं ब्रह्माणं जनितोद्यमौ॥

madhukaiṭabhau durātmānāvativīryaparākramau|
krodharaktekṣaṇau hantuṃ brahmāṇaṃ janitodyamau||

Note: The selected print has अतिवीर्यपराक्रमौ. Its extra syllable is retained rather than silently corrected to fit a regular metrical expectation.

TEXT POSITION 72

समुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः।
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः॥

samutthāya tatastābhyāṃ yuyudhe bhagavānhariḥ|
pañcavarṣasahasrāṇi bāhupraharaṇo vibhuḥ||

TEXT POSITION 73

तावप्यतिबलोन्मत्तौ महामायाविमोहितौ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्॥

tāvapyatibalonmattau mahāmāyāvimohitau|
uktavantau varo'smatto vriyatāmiti keśavam||

TEXT POSITION 74

श्रीभगवानुवाच।
भवेतामद्य मे तुष्टौ मम वध्यावुभावपि।
किमन्येन वरेणात्र एतावद्धि वृतं मया॥

śrībhagavānuvāca|
bhavetāmadya me tuṣṭau mama vadhyāvubhāvapi|
kimanyena vareṇātra etāvaddhi vṛtaṃ mayā||

Note: The main line prints वरेणात्र, while its footnote records वरेणातः. The selected main wording is retained.

TEXT POSITION 75

ऋषिरुवाच।
वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत्।
विलोक्य ताभ्यां गदितो भगवान्कमलेक्षणः॥

ṛṣiruvāca|
vañcitābhyāmiti tadā sarvamāpomayaṃ jagat|
vilokya tābhyāṃ gadito bhagavānkamalekṣaṇaḥ||

TEXT POSITION 76

(प्रीतौ स्मस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः।)
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता॥

(prītau smastava yuddhena ślāghyastvaṃ mṛtyurāvayoḥ|)
āvāṃ jahi na yatrorvī salilena pariplutā||

Note: The first half is parenthesized in the selected print's bold core. The comparison omits it from the main sequence but explicitly quotes it in a footnote as an additional reading in some Markandeya Purana copies. It is preserved here as part of the selected chapter, not added as a new numbered unit.

TEXT POSITION 77

ऋषिरुवाच।

तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता।

कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः॥

ṛṣiruvāca|

tathetyuktvā bhagavatā śaṅkhacakragadābhṛtā|

kṛtvā cakreṇa vai chinne jaghane śirasī tayoḥ||

TEXT POSITION 78

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम्।

प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते॥

evameṣā samutpannā brahmaṇā saṃstutā svayam|

prabhāvamasyā devyāstu bhūyaḥ śṛṇu vadāmi te||

अध्याय-समापन

COLOPHON

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मधुकैटभवधो नाम प्रथमोऽध्यायः॥१॥

iti śrīmārkaṇḍeyapurāṇe sāvarṇike manvantare devīmāhātmye madhukaiṭabhavadho nāma prathamo'dhyāyaḥ||1||